## ॥ श्री मद्वादिराजस्तवाष्टकम् ॥

वंदे श्री वादिराजाचार्य कुंदेंदुस्मितसन्मुखम् ।
संदेहध्वांततरणिं तं देवेष्ट शिखामणिम् ॥ १ ॥

वादिराजगुरुं मायावादिमत्तेभभिद्धरिं ।
साद्बिक्षेत्र निवासं सत्स्वादिमिष्टप्रदं भजे ॥ २ ॥

भजताभीष्टदातारं द्विजवृंदनिषेवितं ।
सुजनेड्यं वादिराजं ऋजुयोगिनमाश्रये ॥ ३ ॥

संसारांभोधितरणिं कंसारीष्टशिखामणिं ।
हंसावलिमणिं वादिराजचिंतामणिं भजे ॥ ४ ॥

सच्छाखं सुमनोल्लासं सच्छायं सद्विजाश्रितं ।
स्वच्छांतरं वादिराजं स्वेच्छाकल्पतरुं भजे ॥ ५ ॥

पद्मानन शुभमहापद्मायत सुलोचनं ।
मुकुंदमानसं वादिराजनिधिमाश्रये ॥ ६ ॥

शंखग्रीवं कुंदरदं करुणामकरालयं ।
सत्कच्छपं वादिराजवरं नवनिधिं भजे ॥ ७ ॥

नीलकेशोल्ल सत्छालं श्रीलरूपाशीतेष्टदं ।
श्रीलसद्वादिराजोरुशीलमिष्टगुरुं भजे ॥ ८ ॥

श्रीमद्विष्णुपदाद्रौ सन्महारण्याश्रिते सदा ।
खेलंतं मयिकरिभिर्वादिराजहरिं भजे ॥ ९ ॥

श्री मज्जीवनगीवंशजेन सध्भक्ति पूर्वकं ।
मन्नारिकृष्ण सुधिया वादिराजास्तवाष्टकं ॥ १० ॥

त्रिंसंध्यंयः पठेन्मर्त्यः स सर्वाभीष्टमवाप्नुयात् ।
आदिव्याधि विनिर्मुक्तः सर्वदा च सुखीभवेत् ॥ ११ ॥

॥ इति श्री मद्वादिराजस्तवाष्टकं संपूर्णं ॥